**प्रचोदक** त्रि॰ प्र+चुद–प्रेरणे ण्वुल् । १प्रेरके स्त्रियां टापि अत इत्त्वम् । प्रचोदिका । सा च दुःसहस्य नियोजिताख्यायां कन्यायां जाते २कन्याभेदे मार्कपु॰ ५१अ॰।

**प्रचोदनी** स्त्री प्रचोद्यते अपसार्य्यते रोगोऽनया चुद–णिच ल्युट् ङीप् । १कण्टकारिकायाम् अमरः । भावे ल्युट् । २प्रेरणे न॰ ।

**प्रच्छ** जिज्ञासायां तु॰पर॰द्विक॰अनिट् । पृच्छति अप्राक्षीत् । पप्रच्छ । द्विकर्मकत्वेन दुह्यादि॰गौणे कर्मणि लकारादि । पृच्छ्यते शिष्येण गुरुः धर्मं, जिज्ञासाविषयकज्ञानानुकूलव्यापारः कथं धर्म्म आचरितव्य इत्यभिलापादिः पृच्छेरर्थः, ज्ञानविषयत्वेन धर्मस्य, तज्ज्ञानाश्रयत्वाच्च गुरोः कर्मत्वम् ।

**प्रच्छद्** न॰ प्रच्छादयति प्र+छादि–क्विप् ह्रस्वः । यत्र "अन्नं वा प्रच्छच्छन्दोऽन्नं प्रच्छद् इति श्रुतेः" यजु॰१ ५।५ वेददीपे दृश्यम् । [आच्छादने वस्त्रादौ ।

**प्रच्छद** पु॰प्रच्छाद्यतेऽनेन प्र+छद–णिच–करणे घ ह्रस्वः ।

**प्रच्छदपट** पु॰प्रच्छाद्यतेऽनेन प्र+छद-णिच्–घ ह्रस्वः कर्म॰। (पाछुडि) प्रावरणवस्त्रे अमरः ।

**प्रच्छना** स्त्री प्रच्छ+बा॰ ल्यु । आमन्त्रणे जटा॰ ।

**प्रच्छन्न** न॰ प्र+छद्-क्त । १गुप्तद्वारे २अन्तर्द्वारे । ३आच्छन्ने त्रि॰ अमरः ।

**प्रच्छर्दन** न॰ प्र+छर्द-भावे ल्युट् । १वमने २कोष्ठस्य वायोर्नासिकापुटाभ्यां निःसारणप्रयत्नभेदे रेचने "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य" पात॰ सूत्रे भाष्यं दृश्यम् । कुम्भकशब्दे २११४ पृ॰ दृश्यम् ।

**प्रच्छर्दिका** स्त्री प्र+छर्द–रोगाख्यायां ण्वुल्" पा॰ ण्वुल् तदन्तः स्त्री । १वमनरोगे अमरः । कर्त्तरि ण्वुल् । २प्रच्छर्दके वमनकारके त्रि॰स्त्रियां टाप् कापि अत इत्त्वम् ।

**प्रच्छादन** न॰ प्रच्छाद्यतेऽनेन छद–णिच्-ल्युट् । १उत्तरीयवस्त्रे हेमच॰ भावे ल्युट् । २आच्छादने "नवोढ़के नवान्ने च गृहप्रच्छादने तथा" स्मृतिः ।

**प्रच्छान** न॰प्र+छो–भावे ल्युट् । १प्रकृष्टच्छेदने २सुश्रुतोक्ते शस्त्रविस्रावणभेदे "तत्र द्विविधं शस्त्रविस्रावणं शिराव्यधनञ्च" सुश्रुतः ।

**प्रच्छिल** त्रि॰ प्रच्छ बा॰ इलच् । निर्जले जलशून्ये हेमच॰

**प्रच्यव** पु॰ प्र+च्यु–अच् । १प्रच्युतियुते । भावे अप् । २प्रचरणे स्वभावत्वरणे "प्रकृतेः स्वभावप्रच्यव" इति सां॰ प्र॰भाष्यम् । भावे ल्युट् । प्रच्यवन चरणे न॰ ।

**प्रज** पु॰ प्रविश्य जायायां जायते जन–ड । पत्यौ भरतः

**प्रजङ्घ** पु॰ प्रकृष्टा जङ्घाऽस्य । राक्षसभेदे रामा॰लं॰८८सर्गे॰।

**प्रजग्मि** त्रि॰ प्र+गम–ज्ञाने कि द्वित्वम् उपधालोपः । प्रज्ञाशीले शत॰ब्रा॰ ५।१।१।१५

**प्रजन** पु॰ प्र+जन–घञ् न वृद्धिः । १प्रजनने । प्रजायतेऽनेन करणे घञ् । स्त्रीगव्यादिषु २पुङ्गवादीनामभिगमने गर्भग्रहणार्थमैथुने २उपसरे (पालदेओया) अमरः ।

**प्रजनन** न॰ प्रजायतेऽत्र प्र+जन–आधारे ल्युट् । १योनौ भावे ल्युट् । २जन्मनि मेदि॰। करणे ल्युट् । ३उपसरे विश्वः । जनयति जनि–ल्यु । ४जनके त्रि॰ यजु॰१८।४८

**प्रजनिका** स्त्री प्रजनयति प्र+जनि–ण्वुल् । मातरि जटा॰।

**प्रजनिष्णु** त्रि॰प्र+जन–इष्णुच् । जनने शत॰ब्रा॰६।४।१७

**प्रजनुक** त्रि॰ प्र+जन बा॰ उक । प्रजननशीले हेमच॰।

**प्रजनू** स्त्री प्र+जन–बा॰ ऊ । प्रजनने तैत्ति॰३।१।१।४२

**प्रजय** पु॰प्र+जि–अच् । प्रकृष्टजये याथादि॰अन्तोदात्तता ।

**प्रजल्प** पु॰प्र+जल्प–भावे घञ् । "असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया । प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते" उज्ज्वलमणिलक्षिते १वाक्यभेदे २प्रकृष्टकथाभेदे च ।

**प्रजविन्** त्रि॰ प्र+जु--इनि । प्रकृष्टवेगयुक्ते अमरः ।

**प्रजहित** पु॰ १पुराणे २गार्हपत्ये वह्नौ ताण्ड्य॰ ब्रा॰ १।४।१॰ भाष्यधृतवाक्यं दृश्यम् ।

**प्रजा** स्त्री प्र+जन--ड ।१सन्ततौ २जने च अमरः"नञ्दुःसुभ्यः परस्य बहु॰असिच्समा॰ । अप्रजाःदुःप्रजाः ।३जनने च

**प्रजागर** पु॰ प्र+जागृ--अप् । प्रकर्षेण जागरणे १निद्राक्षये हला॰। कर्त्तरि अच् । २विष्णौ "पुष्पहासः प्रजागरः" विष्णुस॰ "नित्यं प्रबुद्धत्वात् प्रजागर्त्तीति प्रजागरः" भा॰ प्रजागरयति णिच्–अच् । ३अप्सरोभेदे स्त्री भा॰व॰४३अ॰ ।

**प्रजाता** स्त्री प्रजातं प्रजननं गर्भमोचनमस्त्यस्याः अर्श आद्यच् । १प्रसूतायां स्त्रियाम् हला॰ । प्र+जन-क्त । प्रकर्षेण २जाते त्रि॰ । ३अश्वभेदे पु॰ "बडवायां कृतरेतस्कान्दनः प्रजात इत्युच्यते"कात्या॰श्रौ॰२॰३।२॰भाष्यम्

**प्रजातन्तु** पु॰ प्रजायाः प्रजननस्य तन्तुरिव । सन्ताने तैत्तिरीय॰ ।

**प्रजाति** स्त्री प्र+जन-क्तिन् । १प्रजायां २प्रजनने च ३पौत्रोत्पत्तौ "प्रजा च स्वाध्यायवचने च प्रजनश्च स्वाध्यायवचने च प्रजातिश्च स्वाध्यायवचने च" तैत्तिरीय॰ "तत्र प्रजा स्वयमुत्पाद्या प्रजनश्च प्रजननऋतौ भार्या-